# शुक्लयजुर्वेदकाण्वशाखापरिचयः ॥

## I. उपक्रमः-

भारतीयसंस्कृतौ वेदस्यास्ति महती प्रतिष्ठा। विद ज्ञाने इति धातोः करणार्थकघञ्प्रत्यययोगे निष्पन्नस्य वेदशब्दस्य "वेद्यन्ते बोध्यन्ते प्रमाणान्तरानधिगताबाधिताः दृष्टादृष्टफलकाः कर्मकलापा अनेनेति करणव्युत्पत्या पूर्वोक्तलक्षणसिद्धेः । अपि च "[1]अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेवोऽथर्वाङ्गिरस इतिहासःपुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निश्वसितानि" इति शतपथब्राह्मणोक्तदिशा नित्या सर्वा अपि विद्या भगवतः परब्रह्मणः निःश्वासभूताः इति श्रूयन्ते । तेषु विद्यास्थानेषु वेदाः प्राथम्यं वहन्ते । मन्त्रोक्तप्रकारेण वेदाश्चत्वारः । ऋग्यजुःसामाथर्वणेति । चरणव्यूहोक्तप्रकारेण एकाधिकैकशतशाखायुक्तस्य यजुर्वेदस्य शुक्लकृष्णभेदेन द्वैविध्यं वर्तते । तत्राद्याः पञ्चदशशाखाः शुक्लयजुर्वेदसम्बन्धिन्यः, अवशिष्टा कृष्णयजुर्वेदसम्बन्धिन्यः इति ।

### १. शुक्लयजुर्वेदाविर्भावः-

योगीश्वरो भगवान् याज्ञवल्क्यो हिरण्यगर्भात्मकस्यादित्यस्यानुग्रहाच्छुक्लयजुर्वेदं प्रकाशयामास । शतपथब्राह्मणे- "[2]आदित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते" इति श्रुतत्वात् । वराहपुराणे वेदाध्ययने संप्रदायद्वयं प्रतिपादितं दृश्यते । एको ब्रह्मसंप्रदायः,परश्चादित्यसंप्रदाय इति । कल्पादौ भगवता श्रीविष्णुना शांखासुरापरनामानं हयग्रीवदैत्यं संहृत्य, तेनापहृतो वेदो ब्रह्मणे प्रददे । ब्रह्मा च तं द्वेधा विभज्यैकं भागं भगवदादित्ये संस्थाप्यान्यं च वसिष्ठांङ्गिरसोमरीच्यत्रिप्रभृतिभ्योऽध्ययनविधिना प्रायच्छत् । तेऽपि स्वपुत्रपौत्रशिष्यप्रशिष्येभ्यः प्रायच्छन् । ततो द्वापरान्ते भगवान् वेदव्यासोऽल्पप्रज्ञानल्पशक्तींश्च लोकाननुजिघृक्षुः सन् वेदमेकमृगादिरूपेण चतुर्धा विभज्य, क्रमात्पैलवैशंपायनजैमिनिसुमन्तूनध्यापयामास । तैश्च शाखाप्रभेदादिना परम्परया विस्तारं नीता वेदाः । सैषा वेदचतुष्टयी ब्रह्मसंप्रदाय इति प्रसिद्धिं प्राप ।

योगीश्वरो भगवान् याज्ञवल्क्योऽपि ब्रह्मपरम्परायामस्यामेव वर्तमानः सन् महर्षेर्विदग्धशाकल्यादृग्वेदमध्यगीष्ट । केनापि कारणेन ततोऽधीतं वेदं तत्याज । ततोऽयं महर्षि वैशम्पायनमुपेत्य यजुर्वेदमधीतवान् । दैवदुर्विलासादत्रापि गुरुणा सह विवादे संवृत्ते तदधीतं वेदं त्यक्तवान् । ततोऽयं मानुषरूपं गुरुं नोपैमीति निश्चयपूर्वकं चतुर्विंशलक्षसंख्याकगायत्रीमन्त्रपुरश्चरणादि -तपस्यया सुदृढया भगवन्तं त्रयीमयमादित्यं तोषयित्वा तस्माच्चतुरो वेदानधीतवान् । गुर्वनुज्ञया तान् शाखाप्रशाखाभेदेन विस्तारमनीनयत् । सैषा वेदचतुष्टयी आदित्यसम्प्रदाय इति प्रथामापेदे । तदुक्तम् ।

ब्रह्मणः संप्रदायोऽयं व्याससन्दर्शितोऽभवत् । विभक्तस्यैव वेदस्य संप्रदायो द्विधा मतः ।

---

1 काण्वशतपथब्राह्मणम् 17-2-4-10 | 2 काण्वशतपथब्राह्मणम् 17-6-5-3 |

ब्रह्मणः संप्रदायस्तु आदित्यस्य तथा मतः। अयातयामसंज्ञोऽयं कृत्स्नकर्मप्रकाशकः।
ब्रह्मणः संप्रदायस्तु मिश्रत्वान्न तथा मतः॥ इति॥

न केवलं यजूंष्येव याज्ञवल्क्येन रवेः समधिगतानि, अपि तु चत्वारोऽपि वेदाः समधिगताः।

तदुक्तं स्कान्दे- स तथेति प्रतिज्ञाय प्रविश्यादित्यवाजिनः।
कर्णेऽपठत्ततो वेदान् चतुरोऽपि च तन्मुखात्॥ इति॥

आत्मपुराणे च- इत्युक्तो भगवान् सूर्यो याज्ञवल्क्यं महामुनिम्।
वेदान् षडङ्गसहितान् रहस्यादिसमन्वितान्।
चतुरोऽध्यापयामास स्थापयित्वा निजे रथे॥ इति॥

श्रीमच्छङ्करभगवत्पादाश्च- "अर्थाच्चतुर्वेदो याज्ञवल्क्यः" इति वर्णयन्ति।

**२. शुक्लकृष्णत्वे कारणानि--**

आदित्यसंप्रदायः शुक्लः ब्रह्मसंप्रदायः कृष्ण इत्यभिधीयते। मन्त्रब्राह्मणयोः पार्थक्येनाभिधानं शुक्लत्वहेतुः। तयोर्व्यामिश्रत्वं कृष्णत्वहेतुः। तदुक्तं काण्वसंहिताभाष्योपक्रमे सायणाचार्यैः-

प्रवर्तितः खण्डशस्तैर्न सम्यग्बुध्यते नृभिः।
आध्वर्यवं क्वचिद्धौत्रं क्वचिदित्यवस्थया।
बुद्धिमालिन्यहेतुत्वाद्यजुः कृष्णमितीरितम्।
याज्ञवल्क्यस्ततः सूर्यमाराध्यास्मादधीतवान्।
व्यवस्थितप्रकरणं यजुः शुक्लं तदीर्यते।
पौराणिकीं कथामेतां वेदव्याख्यान आदरात्॥ इति॥

चरणव्यूहभाष्यकारैस्तु अन्यत्कारणमुक्तम्- तद्यथा "एतत्सखिलं सशुक्रियं (ऋचं वाचमिति षट्त्रिंशदध्यायोक्तचतुर्विंशतिऋगात्मकसहितम्) मध्याह्ने शुक्लवर्णेन सूर्येण दत्तं तच्छुक्लं यजुः परिसंख्यातम्" इति। वेदोपाकरणे चतुर्दशीयुक्तपौर्णमासीग्रहणात् शुक्लं यजुः,तैत्तरीयकैर्वेदोपाकरणे औदयिकपर्वग्रहणात् (अर्थात्कृष्णप्रतिपद्विद्धपौर्णमासीग्रहणात्) कृष्णं यजुरिति च तत्रैवोक्तम्। आत्मपुराणे च वान्त्या च भक्षणेनापि कृष्णान्यासन्यजूꣳष्यपि इति कारणान्तरमुक्तम्। देवीभागवते तु यातयामत्वायातयामत्वे यजुषां कृष्णत्वशुक्लत्वयोर्हेतुत्वमुक्तम्।

अयातयामानि तु भानुगुप्तानि अन्यानि जातानि तु नीरसानि।
यजूंषि तेषामथ याज्ञवल्क्यो ह्ययातयामानि रवेरवाप॥ इति॥

येन केनापि हेतुना यजुर्वेदः शुक्लः कृष्ण इति द्वैविध्यं समजनि।

**३. शाखाभेदाः-**

यजुर्वेदस्य शाखा एकाधिकैकशतमिति महाभाष्यमुक्तिकोपनिषच्चरणव्यूहादि ग्रन्थेभ्योऽवगम्यते। तत्र शुक्लस्य यजुषः पञ्चदश शाखा स्मृताः कृष्णस्य यजुषः षडशीतिः शाखा उदाहृताः। शाखानाम वेदैकदेशः। चरणव्यूहे शुक्लयजुः शाखानां पञ्चदशानामपि नामानि निर्दिष्टानि। तानि यथा-

१) काण्वाः, २) माध्यन्दिनाः, ३) शापेयाः, ४) तापनीयाः, ५) कपोलाः, ६) पौण्ड्रवत्साः, ७) आवटिकाः, ८) परमावटिकाः, ९) पाराशर्याः, १०) वैनधेयाः, ११) बौधेयाः, १२) औधेयाः, १३) गालवाः, १४) बैजवापाः, १५) जाबालाः, इति।

एतासु पञ्चदशशाखासु इदानीं काण्वीया माध्यन्दिनीया चेति द्वे शाखे उपलभ्येते । अन्यास्त्रयोदशशाखास्त्वध्ययनतो ग्रन्थतश्च विलुप्ताः । शुक्लयजुषः पञ्चदशशाखासु काण्वमाध्यन्दिनशाखाद्वयं प्रधानतमं भवति । अवशिष्टासु त्रयोदशसु काश्चन शाखाः काण्वानुगाः काश्चन माध्यन्दिनशाखानुगाः।

### ४. काण्वशाखामन्त्रभागपरिचयः-

शुक्लयजुर्वेदस्य संहितापदवाच्यो मन्त्रभागः पार्थक्येन ब्राह्मणभागाद्भिद्यते । स च काण्वे चत्वारिंशदध्यायात्मकः। तत्र संहितायां प्रत्यध्यायं प्रतिपाद्यविषया प्रदर्श्यन्ते।

| **अध्यायसंख्या** | **विषयः।** |
|---|---|
| १--२ | दर्शपूर्णमासौ। |
| ३ | अन्वाधानाग्निहोत्राग्न्युपस्थानचातुर्मास्यानि। |
| ४--९ | अग्निष्टोमः। |
| १० | वाजपेयः। |
| ११ | राजसूयः। |
| १२--२० | अग्निचयनम्। |
| २१--२३ | सौत्रामणी। |
| २४--२७ | अश्वमेधः। |
| २८--३३ | तत्र तत्र विप्रकीर्णा लिंगविनियोज्या अनारभ्याधीता मन्त्राः। |
| ३४--३५ | पुरुषमेधः। |
| ३६--३९ | प्रवर्ग्यः। |
| ४० | ब्रह्मविद्या। |

### ५. काण्वशतपथब्राह्मणे विषयक्रमनिरूपणम् -

काण्वशतपथे सप्तदश काण्डानि सन्ति। तेषां नामानि -

१. एकपात्काण्डम्, २. हविर्यज्ञकाण्डम्, ३. उद्धारिकाण्डम्, ४. अध्वरकाण्डम्, ५. ग्रहकाण्डम्, ६. वाजपेयकाण्डम्, ७. राजसूयकाण्डम्, ८. उखासंभरणकाण्डम्, ९. हस्तिघटकाण्डम्, १०. चितिकाण्डम्, ११. साग्निचितिकाण्डम्, १२. अग्निरहस्यकाण्डम्, १३. अष्टाध्यायीकाण्डम्, १४. मध्यमकाण्डम्, १५. अश्वमेधकाण्डम्, १६. प्रवर्ग्यकाण्डम्, १७. बृहदारण्यकोपनिषत्काण्डम्। इति।

**६. काण्वशतपथब्राह्मणे सप्तदशकाण्डेषु निरूपिता विषयाः -**

१. आधानपुनराधाने, अग्निहोत्रम्, आग्रयणम्, पिण्डपितृयज्ञः, दाक्षायणयज्ञः, उपस्थानादि, चातुर्मास्ययागः।

२. दर्शपूर्णमासेष्टिः।

३. अग्निहोत्रसंबन्धी अर्थवादः, दर्शपूर्णमासीयोऽर्थवादश्च।

४. सोमयागदीक्षा अभिषवादिकर्म च।

५. सोमयागः, सवनत्रयगतं कर्म, षोडशीप्रभृति सोमसंस्थाः, द्वादशाह्वयागः त्रिरात्राहीनदक्षिणा,

चतुस्त्रि९शद्धोमः, सत्रधर्माश्च।

६. वाजपेययागः सपरिकरः।

७. राजसूययागः सपरिकरः।

८. उखासंभरणम्।

९-१२.चयनक्रतुः।

१३. आधानकालः, पथिकृदिष्टिः, प्रयाजानुमन्त्रणम्, शंयुवाकः, पत्नीसंयाजः, ब्रह्मचर्यम्, दर्शपूर्णमासविशेषः, पशुबन्धश्च।

१४. दीक्षाक्रमः, पृष्ठभिप्लवादिसौत्रामणीयागः, अग्निहोत्रप्रायश्चित्तम्, मृतकाग्निहोत्रम्,।

१५. अश्वमेधः।

१६. साङ्गोपाङ्गप्रवर्ग्य कर्म।

१७. ब्रह्मविद्या।

एवं काण्वशाखायाः संहिताब्राह्मणयोः विषयनिरूपणं दृश्यते।

## II. यज्ञियसम्भारपरिचयः –

### १. यज्ञशब्दार्थः

कात्यायनाचार्यैः श्रौतसूत्रे यज्ञशब्दार्थः एवं निरूपितः "[1]यज्ञं व्याख्यास्यामः" "[2]द्रव्यं देवता त्यागः" इति। अत्र व्याख्यानं एवं भवति "द्रव्यं-दधि,सोम,व्रीहि,यवादिः। देवता-अग्नीन्द्रादिः। त्यागः- तदुद्देशेन क्रियमाणः स्वत्वनिवृत्यनुकूलो व्यापारः। इदमेव यागस्वरूपम्। देवतोद्देशेन द्रव्यत्यागरूपस्य यागपदार्थस्य पूर्वाचार्यैर्निरूपणात्। इति।

1-2- कात्यायनश्रौतसूत्रम्- 1-2-1,2,